E-ISSN: 3048-6041 | Volume- 2, Issue- 12 | December 2025

# लक्ष्मीधराचार्यविरचितस्य अद्वैतमकरन्दग्रन्थस्य तात्त्विकविश्लेषणम्

**प्रवीणः म सज्जनः**
शोधच्छात्रः (UGC-JRF), कर्नाटकसंस्कृतविश्वविद्यालयः
Email: praveensajjan1602@gmail.com

**शोधसारः**

लक्ष्मीधराचार्यविरचितः अद्वैतमकरन्दः अद्वैतवेदान्तपरम्परायां लघुग्रन्थत्वेन अपि अतिगूढतत्त्वप्रतिपादकः ग्रन्थः अस्ति। केवलं अष्टाविंशतिः श्लोकैः अस्मिन् ग्रन्थे उपनिषदां सारभूतं ब्रह्मतत्त्वं, आत्मब्रह्मणोः अभेदः, अज्ञानस्य स्वरूपम्, जगतः मिथ्यात्वम्, मोक्षस्य च तात्त्विकस्वरूपं संक्षेपेण किन्तु सुस्पष्टतया निरूपितम्। शाङ्करवेदान्तदृष्ट्या आत्मा नित्यः, शुद्धः, बुद्धः, मुक्तः, सच्चिदानन्दरूपः इति प्रतिपादनं अस्य ग्रन्थस्य मुख्यं दार्शनिकं योगदानं वर्तते। ग्रन्थे शास्त्रप्रमाणैः, युक्तिप्रमाणैः, दृष्टान्तैः च आत्मब्रह्मैक्यस्य सिद्धिः प्रदर्शिता अस्ति। महावाक्यानां समन्वयः, घटाकाश–सर्परज्जु–स्वप्नादिदृष्टान्तानां प्रयोगः, तथा शङ्करभाष्यगौडपादकारिकासम्बद्धदृष्टिः अद्वैतसिद्धान्तस्य दृढतां वर्धयन्ति। जगत् मायारूपं, बन्धमोक्षौ अविद्याकल्पितौ, ज्ञानमेव मोक्षहेतुः इति सिद्धान्तः अस्मिन् ग्रन्थे स्पष्टतया प्रतिष्ठापितः। अतः अद्वैतमकरन्दः केवलं वेदान्तप्रवेशग्रन्थः एव न, अपि तु आत्मविद्यायाः सारस्वरूपं मधुरया शैलीया उपदिशन् साधकानां कृते अत्यन्तं उपयोगी मार्गदर्शकः अस्ति। अस्य अध्ययनमननाभ्यां आत्मब्रह्मैक्यबोधः दृढीभवति, अविद्यानिवृत्तिः सिध्यति, अद्वैतनिष्ठा च साधकहृदये स्थिरीभवति इति निष्कर्षः।

**प्रस्तावना**

अद्वैतवेदान्तपरम्परायां लघुग्रन्थानाम् अपि माहात्म्यं दृश्यते। तत्र लक्ष्मीधराचार्यविरचितः अद्वैतमकरन्दः एकः लघु एव ग्रन्थः, तथापि गहनतत्त्वदर्शी च वर्तते। केवलं २८ श्लोकैः एव सम्पूर्णस्य अद्वैतसिद्धान्तस्य सारः अत्र सम्यक् निरूपितः। अस्य ग्रन्थस्य नामकरणं “मकरन्दः” इति प्रतीकमूलकम् अस्ति – यथा मकरन्दस्य एकः बिन्दुः अपि रसिकायाः हृदयं तर्पयति, तथैव अस्य ग्रन्थस्य एकः श्लोकः अपि साधकस्य चित्तं ब्रह्मबोधेन तर्पयति।

**आत्मब्रह्मणोः अभेदः**

ग्रन्थस्य आद्यः श्लोकः एव “अहमेव परं ब्रह्म नान्यदस्ति कदाचन” इति आत्मब्रह्मणोः अद्वैतं प्रतिपादयति। उपनिषत्सु अहं ब्रह्मास्मि (बृहदारण्यक), तत्त्वमसि (छान्दोग्य), प्रज्ञानं ब्रह्म (ऐतरेय) इत्यादि महावाक्यानां भावः एव अत्र संक्षिप्ततया प्रतिफलति। लक्ष्मीधराचार्यः आत्मस्वरूपं ब्रह्मस्वरूपं च अभिन्नं इति प्रतिपाद्य, अद्वैतवेदान्तस्य मूलं सुस्पष्टं करोति। अहमेव परं ब्रह्म नान्यदस्ति कदाचन। इत्येवं रूपेण प्रतिपादयति

अद्वैतवेदान्तदर्शनस्य सर्वाधिकं तत्त्वं “आत्मा एव ब्रह्म” इति। आत्मनः (व्यष्टिचैतन्यस्य) ब्रह्मणः (समष्टिचैतन्यस्य) च यः ऐक्यम् उपनिषद्भ्यः प्रतिपाद्यते, स एव आत्मब्रह्मणोः अभेदः इत्युच्यते।

**१. शास्त्रप्रमाणसमर्थनम्**

**महावाक्यप्रमाणम्**

छान्दोग्योपनिषत् (६।८।७): तत्त्वमसि श्वेतकेतो

बृहदारण्यकोपनिषत् (१।४।१०): अहं ब्रह्मास्मि

ऐतरेयोपनिषत् (३।१।३): प्रज्ञानं ब्रह्म

माण्डूक्योपनिषत् (७): स आत्मा स विज्ञेयः

एतेषु वाक्येषु प्रतिपाद्यते यत्, जीवस्य यः आत्मा, स एव ब्रह्म।

**गीता प्रमाणम्** - भगवद्गीता (१३।२३):

"उपद्रष्टानुमन्ता च भर्ता भोक्ता महेश्वरः।

परमात्मेति चाप्युक्तो देहेऽस्मिन्पुरुषः परः॥"

अत्र देहे स्थितः आत्मा परमात्मैव इत्युक्तम्।

**तर्कसमर्थनम्**

**घटाकाशदृष्टान्तः**

यथा घटान्तर्गतः आकाशः भिन्नः नास्ति महाकाशात्, केवलं घटोपाधिना सीमितः इव दृश्यते। घटस्य भङ्गे स एव महाकाशे लीयते। तथैव जीवात्मा ब्रह्मणः भिन्नः न, केवलं देहाद्युपाधिभिः सीमितः इव।

**सूर्यकिरणदृष्टान्तः**

यथा सूर्यः एकः, किन्तु नद्यादिषु प्रतिबिम्बरूपेण नानात्वेन दृश्यते। नद्यपवित्रताया दूषणस्य वा भेदेन सूर्यस्य न किंचन दूषणम्। तथैव आत्मा सर्वेषु शरीरेषु प्रतिबिम्बितः, किन्तु स्वरूपतः ब्रह्मैव।

**शङ्करभाष्यदृष्टिः**

शङ्कराचार्यः ब्रह्मसूत्रभाष्ये [1] स्पष्टं वदति

"तत्त्वमसि इत्यादिश्रुतीनां पुनः पुनरनुवादात् आत्मनः ब्रह्मणः च अभेदः एव सिद्ध्यति।"

तेन च अभेदज्ञानं मोक्षहेतुः इति निष्कर्षः प्राप्यते।

**जगतः मिथ्यात्वम्**

अस्मिन् ग्रन्थे जगत् भ्रान्त्युपस्थितम् इति दृष्ट्या निरूपितम्। "यदिदं हृदि स्फुरति तज्जगदाख्यमनर्थवद्भ्रान्त्या" इति श्लोके स्पष्टतया उक्तं यत् आत्मनि एव जगत्स्वरूपेण भ्रान्तिः प्रतीयते। वस्तुतः ब्रह्मैव सत्यं, जगत् तु मायारूपम्। अयं विचारः शाङ्करवेदान्ते "ब्रह्म सत्यं जगन्मिथ्या जीवो ब्रह्मैव नापरः" इत्यनेन सूत्ररूपेण प्रसिद्धः।। तत्र मूलाज्ञानं तूलाज्ञानमिति अज्ञानं द्वविधं भवति । तत्र घटावारकम् अज्ञानं तूलाज्ञानम्, ब्रह्मावारकं अज्ञानं मूलाज्ञानम् इति अज्ञाने द्वैविध्यं सम्पाद्यते येन च आक्षेपः एवं स्यात् यत् – घटावारके अज्ञाने नष्टे सति अज्ञानं तु नष्टं तस्मात् ब्रह्मप्राप्तिः स्यात् खलु। एतादृश आक्षेपस्य उत्तरार्थमेव इह अज्ञानं द्विधा उक्तमिति । तत्र अज्ञानस्यैव विषये चिन्त्यमाने ज्ञायते यत्

अज्ञानं नाम – "सदसद्भ्यामनिर्वचनीयं त्रिगुणात्मकं ज्ञानविरोधि भावरूपं यत्किञ्चित् इति वदन्ति"[2] इति वेदान्तसारे उच्यते तत्र अज्ञानस्य यदि सद्रूपत्वं तर्हि अद्वैतहानिः – केवलस्य ब्रह्मणः एव सद्रूपत्वं भवितुमर्हति यतः एकेनैव सर्वानुगतेन सत्त्वेन सर्वत्र सत्प्रतीत्युपपत्तौ ब्रह्मवत् प्रत्येकं प्रपञ्चस्य सत्स्वभावताकल्पने मानाभावात्, अनुगतव्यवहाराभावप्रसङ्गाच्च।

---

[1] (१।१।४)

[2] वेदान्तसारः

इत्येवं यदि प्रपञ्चस्य पृथक् सत्ता कल्प्यते तदा तु अनुगतव्यवहारः न स्यात्। घटः सन् , पटः सन् इत्येवं तस्मात् कारणात् ब्रह्मणः केवलस्य सद्रूपत्वं वक्तव्यं नान्यस्य, तस्मात् अज्ञानस्य सद्रूपत्वं न वक्तुं शक्यते, अपि च अज्ञानस्य असद्रूपत्वं वदामः इत्यपि न शक्यते वक्तुं यतः शशविषाणवत् अत्यन्तं तुच्छः पदार्थः अयं नास्ति । किञ्च असद्रूपं चेत् कारणत्वानुपपत्तेः तस्मात् सदसद्रुपमिति वदामः इति चेत् विरोधात् न शक्यते – तस्मात् सदसदभावरूपमित्येव वक्तव्यमित्यभिप्रायः । एवं सदसद्भ्यामनिर्वचनीयं इति उक्ते सति सद् अपि न असद् अपि न इति कथनात् एतादृशः पदार्थः एव न स्यात् इति मन्यते चेत् तदा वक्तव्यं यत् त्रिगुणात्मकम् इति । त्रिगुणात्मकमिति कः अर्थः इति चेत् सत्वरजस्तमो रूपगुणात्मकमित्यर्थः तत्र अजामेकां लोहतशुक्लकृष्णां इत्यादि श्रुतिभ्यः इदमज्ञानमेकमव इति ज्ञायते तत्र व्योमादिरूपेण परिणतस्य सत्यवद्भासमानत्वेन संसारानिवृत्तिः स्यात् इति चेत् उच्यते यत् – ज्ञानवरोधि इति अर्थात् तत्र ज्ञानविरोधि इति कथनात् एतस्य अज्ञानस्य नाशः अवगम्यते अर्थात् बाध्यत्वं अवगम्यते । तथा सति ज्ञानं तु भावरूपं अज्ञानं तु अभावरूपमिति चिन्तयेत् कश्चित् इति अग्रिमं दलमुच्यते यत् भावरूपमिति । तस्मात् दलकृत्य पुरस्सरं अज्ञानस्य लक्षणं वेदान्तसारोक्तदिशा चिन्तितम् । तत्र स्मृतस्य उपेक्षा अनर्हत्वात् – प्रकृते प्रमाणव्यापरस्य विषये चिन्त्यमाने अज्ञाननाशपर्यन्तं प्रमाणव्यापारः भवति

**आत्मस्वरूपवर्णनम्**

ग्रन्थे आत्मा शुद्धः, बुद्धः, नित्यः, परमानन्दरूपः, अजः, कूटस्थः इत्यादिभिः विशेषणैः निरूपितः। लक्ष्मीधराचार्यः आत्मनः नित्यत्वं, अजत्वं, अद्वितीयत्वं च निरूप्य, आत्मा न कदापि बन्धनग्रस्तः इति सूचयति। अज्ञानकृतः एव बन्धः कल्पितः; तस्मात् अज्ञाननिवृत्तिः एव मोक्षः। आत्मस्वरूपवर्णनम् इत्युक्ते आत्मनः यथार्थस्वभावस्य निरूपणम्। अद्वैतवेदान्तपरम्परायां आत्मस्वरूपं निरुपाधिकं शुद्धचैतन्यमेव। नास्य जन्मास्ति, न मृत्युः न पुनः परिबन्धः।

**आत्मस्वरूपवर्णनम् (संक्षेपेण)**

शुद्धचैतन्यम् आत्मा। न शरीरः, न इन्द्रियम्, न मनः, न बुद्धिः। यत्साक्षिरूपेण एतानि सर्वाणि प्रकाशयति, तत् शुद्धं चैतन्यमेव आत्मा। असङ्गत्वम् आत्मा सर्वेषु अवयवेषु उपाधिषु तिष्ठन् अपि तेषु निबद्धो न भवति। यथा आकाशः घटादिषु अन्तर्बद्धः सन् अपि तैः न लिप्यते, तथैव आत्मा। आत्मा कदापि न जायते, न म्रियते, न विक्रियते। न जायते म्रियते वा कदाचिन्नायं भूत्वा भविता वा न भूयः।[3] अद्वितीयत्वम् आत्मा केवलः, तस्य तुल्यं किञ्चित् नास्ति। एकमेवाद्वितीयम्।[4] आनन्दरूपत्वम् आत्मा, न केवलं ज्ञानस्वरूपः, किन्तु परमानन्दरूपः। तैत्तिरीयोपनिषदि कथितं यत् सच्चिदानन्दरूपं ब्रह्म।

**उपनिषद्भ्यः उद्धरणानि**

- बृहदारण्यकोपनिषत् (४।५।१५) अयमात्मा ब्रह्म आत्मा एव ब्रह्म भवति। कठोपनिषत् (२।२।१३) आत्मानं रथिनं विद्धि शरीरं रथमेव तु। माण्डूक्योपनिषत् (७) नान्तःप्रज्ञं न बहिःप्रज्ञं... प्रपञ्चोपशमं शान्तं शिवमद्वैतं चतुर्थं मन्यन्ते स आत्मा स विज्ञेयः।

**बन्धमोक्षयोः असत्यत्वम्**

ग्रन्थकारः स्पष्टतया लिखति न मे बन्धोऽस्ति मोक्षो वा भ्रान्तिमात्रं निरूपितम्। अत्र आत्मा न कदापि बद्धः, न च वास्तवेन मोक्तव्यः इति तत्त्वदर्शनम्। यः जीवः अज्ञानात् बन्धं पश्यति, ज्ञानसमये स एव भ्रान्तिनिवृत्तिः मोक्षरूपेण प्रतीयते। अतः मोक्षः कश्चन नूतनः लाभः न, किन्तु स्वस्वरूपस्य अविद्यावृतौ निवृत्तिः एव।

---

3 *गीता* (२।२०)

4 *छान्दोग्योपनिषत्*

अद्वैतवेदान्तदर्शने परमं तत्त्वं ब्रह्मैव नित्यं शुद्धं बुद्धं मुक्तं सच्चिदानन्दरूपम्। अस्य परमार्थदृष्ट्या जीवस्य न किञ्चिद्बन्धनं न मोक्षः, केवलं अविद्यया कल्पितं भ्रान्तिरूपमेव।

**१. शास्त्रदृष्टिः**

नायं आत्मा बध्यते वा विमुच्यते वा।

आत्मा न कदापि बध्यते, न मोच्यते।[5]

**असङ्गत्वश्रुतेः**

असङ्गो ह्ययं पुरुषः [6]

आत्मा सर्वथा असङ्गः, तस्मात् बन्धनमोक्षयोः प्रश्नः नास्ति।

गौडपादाचार्यः
निरोधो न चोत्पत्तिर्न बद्धो न च साधकः।

न मुमुक्षुर्न वै मुक्त इत्येषा परमार्थता॥[7]

अत्र स्पष्टं प्रतिपाद्यते यत् बन्ध-मोक्षौ व्यावहारिकसत्ये स्तः, परमार्थतोऽनयोः असत्त्वमेव।

**२. युक्तिदृष्टिः**

**आत्मा नित्यशुद्धस्वरूपः**

यदि आत्मा सच्चिदानन्दरूपः नित्यः शुद्धः च, तर्हि बन्धोऽपि न सम्भवति। यः बध्नाति स च अन्यः कश्चित् कल्प्येत, किन्तु तादृशः कोऽपि नास्ति।

**बन्धस्य अनिर्वचनीयत्वम्**

बन्धः यदि वास्तविकः, तर्हि मोक्षोऽपि असम्भवः। यदि पूर्णतया असत्, तर्हि शास्त्रस्य प्रयोजनं व्यर्थम्। तस्मात् बन्धः केवलं अविद्याकल्पितः सदसद्विलक्षणः अनिर्वचनीयः।

**दृष्टान्ताः**

**सर्परज्जुदृष्टान्तः** यथा रज्जौ सर्पभ्रमः स्वभावतो नास्ति, तथैव आत्मनि बन्धो नास्ति।

**स्वप्नदृष्टान्तः** स्वप्ने बद्धः जनः जागरणे मुक्तः भवति, वस्तुतः तत्र न बन्धः न मोक्षः।

**३. शङ्करभाष्यदृष्टिः**

शङ्कराचार्यः गीता[8] भाष्ये वदति

---

[5] बृहदारण्यकोपनिषत् (४।३।२३)

[6] (बृह. उ. ४।३।१५)

[7] माण्डूक्यकारिका (२।३२)

[8] (१३।३२)

यः आत्मा सर्वगतः, न चोपाधिभिः लिप्यते, तस्मात् न कदाचिद्बध्यते, न मोच्यते।

तथैव ब्रह्मसूत्रभाष्ये [9]

न हि मुक्तस्य मोक्षो नाम कश्चिदस्ति, नापि बद्धस्य कश्चित् बन्धः परमार्थतः। केवलं अज्ञानकल्पित एवायम्।

**ज्ञानस्य प्रमुखता**

कर्म वा उपासनाः साधनभूताः, किन्तु मोक्षहेतुः न सन्ति। ते केवलं अन्तःकरणशुद्ध्यर्थं साधकाय उपयुज्यन्ते। मोक्षस्य मूलं तु आत्मब्रह्मणोः अभेदज्ञानम् एव। अयं विचारः उपनिषदां भाष्येषु शङ्कराचार्येण प्रतिपादितः, स एव अत्र स्पष्टतया दृष्टिगोचरः।

**तात्त्विकविश्लेषणम्**

अद्वैतमकरन्दः लघुग्रन्थत्वेन अपि साधकाय महदुपकारकः। तत्र उपनिषद्वाक्यानां सारभूतं तत्त्वं सरलया शैल्या प्रदर्शितम्। शास्त्रार्थस्य गाम्भीर्यं, उपनिषद्वाक्यसमन्वयः, आत्मनः स्वरूपप्रतिपादनम्, मोक्षस्य स्वरूपनिर्णयः एते सर्वे अत्र संग्रहीताः सन्ति । अतः अयं ग्रन्थः अद्वैतवेदान्तस्य प्रवेशद्वाररूपेण मान्यः।

अद्वैतमकरन्दः लघुग्रन्थत्वेन अपि अतिगूढतत्त्वप्रतिपादकः ग्रन्थः। लक्ष्मीधराचार्येण विरचितः अयं ग्रन्थः अद्वैतवेदान्तप्रवेशाय साधकानामुपकारकः भवति।

**उपनिषद्वाक्यानां सारभूततत्त्वनिर्णयः**

अत्र ग्रन्थे उपनिषदां महावाक्यानि तत्त्वमसि, अहं ब्रह्मास्मि, प्रज्ञानं ब्रह्म, अयमात्मा ब्रह्म इत्यादीनां गूढार्थः सरलया शैलीया निरूपितः।

उपनिषद्वाक्यानां समन्वयः (श्रुतिसामञ्जस्यं) अत्र मुख्यं तात्त्विकं योगदानम्।

**आत्मस्वरूपप्रतिपादनम्**

आत्मा नित्यः, शुद्धः, बुद्धः, मुक्तः, सच्चिदानन्दरूपः इति अत्र स्पष्टं प्रदर्शितम्।

देह-मनः-प्राणादिभिः आत्मा न संबध्यते, किन्तु साक्षिरूपेण तेषां सर्वेषां प्रकाशक एव।

**मोक्षस्वरूपनिर्णयः**

मोक्षः न कश्चित् नवीनः भावः, किन्तु आत्मस्वरूपस्य एव अवगमः।

अविद्यानिवृत्तिः मोक्षः इति सिद्धान्तः ग्रन्थे विशेषेण प्रतिपादितः।

**शास्त्रार्थगाम्भीर्यं सरलशैली च**

ग्रन्थः अत्यल्पशब्दप्रयोगेनापि शास्त्रस्य गहनं तत्त्वं प्रकाशयति।

उदाहरणोपमा-दृष्टान्तप्रयोगेन जटिलं विषयं साधकस्य हृदयंगमं करोति।

---

[9] (२।१।२२)

E-ISSN: 3048-6041 | Volume- 2, Issue- 12 | December 2025

**अद्वैतवेदान्तस्य प्रवेशद्वाररूपता** यः साधकः वेदान्तशास्त्रं गभीरतरं ग्रन्थानां (ब्रह्मसूत्रभाष्य, उपनिषद्भाष्य, पञ्चदशी, विवेकचूडामणि इत्यादीनाम्) अध्ययनं कर्तुमिच्छति, तस्य कृते अयं अद्वैतमकरन्दः प्रथमोपयोगी मार्गदर्शकः भवति।

अयं ग्रन्थः आत्मविद्यायाः आरम्भिकाध्यायनाय उपयुक्तः प्रवेशद्वारः इव कार्यं करोति।

आत्मनः स्वयंप्रकाशत्वम्

नान्तःप्रज्ञं न बहिष्प्रज्ञं नोभयतः प्रज्ञं न प्रज्ञानघनं न प्रज्ञं नाज्ञम्।

अदृष्टमव्यवहार्यम्ग्राह्यमलक्षणमचिन्त्यमव्यपदेश्यमेकात्मप्रत्ययसारं

प्रपञ्चोपशमं शान्तं शिवमद्वैतं चतुर्थं मन्यन्ते स आत्मा स विज्ञेयः ॥[10]

अत्र च पूर्वं त्रिभिः श्लोकैः विधिमुखेन पादत्रयं कथयित्वा अधुना इह चतुर्थपाद कथनावसरे निषेधमुखेन कथ्यते इति इदं कथं स्यात्, दोषः खलु इति चेत् तदा उच्यते । सर्वशब्दप्रवृत्तिनिमित्तशून्यत्वात् तस्य शब्द-अनभिधेयत्वं ततः च तस्य विधिमुखेन वक्तुम् अशक्यत्वात् निषेधमुखेन वदनं च सम्भवति इति । तत्र सर्वशब्दप्रवृत्तिनिमित्तानि च इत्थं वर्तन्ते – षष्ठी, रूढिः,जातिः,क्रिया,गुणःवा इत्येवं शब्दप्रवृत्तिनिमित्तानि वर्तन्ते। एतेषु कस्यचिदेकस्य सत्वे तत्र शब्दप्रवृत्तिनिमित्तसत्वात् शब्दाभिधेयं तद् भविष्यति । अन्यथा शब्दाभिधेयं तन्नभविष्यति । प्रकृते च अस्मिन् श्लोके उक्तेषु शब्दप्रवृत्तिनिमित्तेषु कस्यचिदपि नान्तर्भावात् शब्दाभिधेयत्वं नास्ति तस्मात् निषेधमुखेन एव उच्यते इति । सदसतोः सम्बन्धः भवितुं नार्हति इति प्रथमस्य निमित्तस्य बाधः । गवादिवत् अत्र प्रमाणान्तरविषयत्वमपि नास्ति नापि रूढिः सम्भवति । निष्कलं निष्क्रियं शान्तं निरवद्यं निरंतरम् इति श्रुत्यनुरोधेन इह क्रिया अपि निमित्तं नहि वर्तते । एवं निर्गुणत्वमपि उक्तम्।

अत्र च कश्चन विशेषांशः वर्तते यत् यथा तत्र घटविज्ञाने जननीये उपादित्सितं घटविज्ञानम् अनुपादित्सितं च तमोनिवृत्तिः। घटतमसोः विवेककरणे प्रवृत्तं प्रमाणं अनुपादिसितततमोनिवृत्तिफलावसानम् अर्थात् तावत् पर्यन्तमेव प्रमाणव्यापारः प्रवर्तते ।ततः घटविज्ञानं तु अनुनिष्पन्नतया भविष्यति इति घटविज्ञानं नान्तरीयकम् इत्युक्तम् एवमेव प्रकृते अपि अयं मन्त्रः अन्तःप्रज्ञत्वादिविकल्पनिवृत्तिफलावसानः विकल्पनिवृत्तिपर्यन्तमेव मन्त्रः भवति तदनन्तरं तु मन्त्ररूपं शास्त्रमिदं नहि प्रवर्तते तर्हि तुरीयस्य अधिगमः कथं भवतीति न प्रष्टव्यं यतः तुरीयाधिगमः तु नान्तरीयकः इति अर्थात् अनुनिष्पन्नतया तुरीयाधिगमः भविष्यति इत्यर्थः । यदि तावत् प्रमाणव्यापारः तमसः निवृत्तौ सत्यामपि घतविज्ञानपर्यन्तं प्रवर्तते। यदि वा अयं मन्त्रः अन्तःप्रज्ञत्वादिविकल्पप्रतिषेधोत्तरमपि तुरीयाधिगमं प्रति प्रवर्तते , तर्हि छिदि इति क्रिया या वर्तते सा अवयवद्वैधीभावपर्यन्तमेव भवति चेदपि द्वैधीभावव्यतिरेकेण सा क्रिया अनुवर्तते इत्यभ्युपगमनं कृतमिव स्यात् ।यतः एवं छिदिक्रियायाः द्वैधीभावफलपर्यन्तमेव सत्वं न तदुत्तरमपि । अतः एव इहापि तमसः निवृत्तिफलावसानं प्रमाणम् तथैव अयं मन्त्रः अपि अन्तःप्रज्ञत्वादिविकल्पप्रतिषेधपर्यन्तमेव स्थायि इत्यवगम्यते इति। तुरीयाधिगमः नान्तरीयकः घटविज्ञानं नान्तरीयकम् इति एतावता विचारः कृतः । सम्प्रति यदा अनेन मन्त्रेण अन्तःप्रज्ञत्वाद्विकल्पानां निवृत्तिः तत्समकालमेव प्रमातृत्वादिभेदस्यापि निवृत्तिः सम्भवति इति उच्यते ।

ज्ञाते द्वैतं नहि विद्यते ज्ञानस्य द्वैतनिवृत्तिः यस्मिन् क्षणे भवति तस्मिन् एव क्षणे वृत्तिज्ञानस्यापिनिवृत्तत्वात् तदुत्तरक्षणे च तस्य अनवस्थानात् । यस्मिन् क्षणे ज्ञाने सति द्वैतनिवृत्तिः भवति तस्मिन् एव क्षणे ज्ञानस्यापि निवृत्तिः भवति । एवं विषयः अयं माण्डूक्योपनिषदि सोयमात्मा इति महावाक्यस्य एकस्य निरूपणकाले सोयमात्मा च चतुष्पाद् वर्तते इति प्रतिज्ञाय प्रत्येकं पादमपि कथयित्वा चतुर्थपादः अर्थात् तुरीयः तद्विषये वक्तव्ये एषः विचारः चर्चितः वर्तते । श्लोकार्थः

[10] माण्डूक्योपनिषद् - ७

– तुरीयाधिगमार्थः – निषेधमुखेन कृतः शाङ्करभाष्ये । अयमेवार्थः अस्माभिः न्यायतः अपि प्राप्तुं शक्यते . एकस्य एकार्थत्वेन प्रयोजनं सिद्धं चेत् ततः तस्य अपरं प्रयोजनं न हि वक्तव्यमिति तत्र तत्र शास्त्रे प्रसिद्धं वर्तते । अतः कृत्वा प्रकृते तमोनिवृत्तिः कर्तव्या एव अन्यथा घटज्ञानं न भवति । तस्मात् प्रमाणाव्यापारस्य ज्ञानरूपत्वं उक्तं गौण्या वृत्या "वृत्तिज्ञानस्यैव ज्ञानत्वोपचारः इति"[11]

एतादृश वृत्तिरूपज्ञानस्य तु ज्ञानत्वेन तमोनिवृत्तौ एव प्रयोजनं वक्तुं युक्तमिति तमोनिवृत्तिः एव प्रयोजनं प्राप्तं चेत् ततः प्रमाणव्यापारोपि उपशान्तः भवति इति प्रमाणव्यापारस्य एकार्थत्वेन एकार्थे सिद्धे ततः सः प्रमाणव्यापारः एकं प्रयोजनं सम्प्राप्यापि अग्रे अनुवर्तते इत्यत्र प्रमाणाभावात् । अग्रे नानुवर्तते ततः घटविज्ञानं नान्तरीयकम् । एवमेव इहापि तुरीयाधिगमः नान्तरीयकं इति सिद्धम्। अत्र अविद्यानिवृत्तिः इति वक्तव्ये अथवा आवरणभङ्गः इति वक्तव्ये सर्वत्र ग्रन्थे तमोनिवृत्तिः इति कथिता अस्ति तस्य च आशयः तमसः कार्यमेव ज्ञानावरणमिति तस्मात् तथा उच्यते इति।

तत्र भगवद्गीतायां सत्वं सुखे सञ्जयति रजः कर्मणि भारत।

ज्ञानमावृत्य तु तमः प्रमादे सञ्जयच्युत॥[12] एतत् श्लोकानुसारेण अत्र प्राप्तुं शक्यते यत् ज्ञानमावृत्य तु तमः इति उक्तत्वात् अत्र ज्ञानावरणं वर्तते तमः इति । अतः ज्ञानावरणभङ्गे वक्तव्ये तमोनिवृत्तिः तमोनिवृत्तिः इति ग्रन्थे उच्यते । तर्हि अन्ततो गत्वा श्लोकार्थः कः आगतः इति पदशः वयं पश्यामः – नान्तः प्रज्ञं – तैजसः प्रतिषेधः न बहिष्प्रज्ञं – विश्वप्रतिषेधः

नोभयतः प्रज्ञम् इति जाग्रत्स्वप्नयोः अन्तरालावस्थाप्रतिषेधः । न प्रज्ञानघनमिति सुषुप्तावस्था प्रतिषेधः । न प्रज्ञम् इति युगपत्सर्वविषयप्रज्ञातृत्वप्रतिषेधः । नाप्रज्ञमित्यचैतन्यप्रतिषेधः।

**नैय्यायिकमतस्य एतन्मतवैलक्षण्यम्**

नैय्यायिकमते तु प्रत्यक्षत्वप्रयोजकं भिन्नमेव इति कृत्वा अवगन्तुं शक्यते यत् तैः घटस्य वा कस्यचिदपि विषयस्य अज्ञानावरणं नाभ्युपगम्यते इति। तेषां मते इन्द्रियार्थसन्निकर्षजन्यं ज्ञानं प्रत्यक्षमिति स्वीक्रियते। यदा इन्द्रियेण विषयस्य सन्निकर्षः जायते, तदा एव तस्य विषयस्य प्रत्यक्षज्ञानं भवति इति तेषां सिद्धान्तः। एतेषां मते केवलं विषयेन सह इन्द्रियस्यैव व्यापारः भवति; अन्तःकरणस्य पृथक् कोऽपि व्यापारः न स्वीक्रियते। अस्माकं तु (अद्वैतवेदान्तिनां) मते इन्द्रियेण सह अन्तःकरणस्यापि बहिर्देशगमनं आवश्यकं कथ्यते। यथा कदाचित् पुरुषः मनसा अन्यत्र चिन्त्यमानः सन् कस्मिंश्चिद् विषये चक्षुरिन्द्रियव्यापारं करोति चेत्, तथापि मनसः अन्यत्र व्यग्रत्वात् सः विषयः चक्षुरिन्द्रियेण सन्निकृष्टः अपि न विषयीकृतो भवति। अतः अस्माकं मतानुसारं चक्षुरिन्द्रियं द्वारीकृत्य अन्तःकरणस्यापि विषयाभिमुखं गमनं यद् कथ्यते, तदेव युक्तिसंगतम् इति वक्तव्यम्। इत्येवं तेषां अभिप्रायः। अतः नैय्यायिकमते अज्ञानावरणं नाभ्युपगम्यते, अपि तु घटविज्ञानपर्यन्तमेव प्रमाणव्यापारः प्रवर्तते इति अर्थतः वक्तुं शक्यते। अद्वैतवेदान्ते तु अज्ञानं द्विविधं स्वीक्रियते— मूलाज्ञानं च तूलाज्ञानं च। तत्र घटादिविषयकं यदावरणं तत् *तूलाज्ञानम्*, ब्रह्मविषयकं यदावरणं तत् *मूलाज्ञानम्* इति अज्ञानस्य द्वैविध्यं निरूप्यते। अनेन च एकः आक्षेपः सम्भवति— यत् घटावारकस्य अज्ञानस्य नाशे सति अज्ञाननाशः जातः, तस्मात् ब्रह्मप्राप्तिः अपि स्यात् खलु इति। एतादृशस्य आक्षेपस्य निरासार्थमेव अज्ञानस्य द्वैविध्यं अद्वैतवेदान्ते प्रतिपादितम्।

**सारांशः**

प्रस्तुत शोधलेखे लक्ष्मीधराचार्यविरचित अद्वैतमकरन्द ग्रन्थस्य तात्त्विकविश्लेषणं कृतम्। अयं ग्रन्थः केवलं अष्टाविंशतिः

[11] वेदान्तपरिभाषा - प्रत्यक्षखण्डे

[12] भगवद्गीता 14/9

श्लोकैः अद्वैतवेदान्तस्य सारभूततत्त्वं प्रतिपादयति। शाङ्करवेदान्तपरम्परायां स्थितः अयं लघुग्रन्थः आत्मब्रह्मणोः अभेदं, जगतः मिथ्यात्वं, अज्ञानस्य स्वरूपं तथा मोक्षस्य तात्त्विकस्वरूपं सुस्पष्टतया निरूपयति। ग्रन्थे उपनिषदां महावाक्यानां समन्वयः, शास्त्रप्रमाण-युक्तिप्रमाणयोः समुचितप्रयोगः, तथा घटाकाश-सर्परज्जु-स्वप्नादिदृष्टान्तानां माध्यमेन अद्वैतसिद्धान्तस्य दृढता प्रदर्शिता अस्ति। आत्मा नित्यः, शुद्धः, बुद्धः, मुक्तः, सच्चिदानन्दरूपः इति प्रतिपादनं तथा बन्धमोक्षयोः अविद्याकल्पितत्वं अस्य ग्रन्थस्य केन्द्रीयविषयः वर्तते। अतः अद्वैतमकरन्दः साधकानां कृते अद्वैतवेदान्तप्रवेशद्वाररूपेण उपयुक्तः ग्रन्थः अस्ति, यः आत्मब्रह्मैक्यबोधं जनयित्वा अविद्यानिवृत्तिं मोक्षरूपेण प्रतिष्ठापयति इति निष्कर्षः।

**लघुशोधप्रबन्धे उपयुक्ता ग्रन्थसूची**

1. लक्ष्मीधराचार्यः — *अद्वैतमकरन्दः*। सम्पादकः स्वामी माधवानन्दः। कोलकाता: अद्वैताश्रमः, १९५०।
2. शङ्कराचार्यः — *उपनिषद्भाष्याणि* (बृहदारण्यक-, छान्दोग्य-, माण्डूक्य-उपनिषद्भाष्याणि)। वाराणसी: चौखम्बा विद्याभवनम्, २००८।
3. शङ्कराचार्यः — *ब्रह्मसूत्रभाष्यम्*। सम्पादकः स्वामी गम्भीरानन्दः। कोलकाता: अद्वैताश्रमः, १९९३।
4. गौडपादाचार्यः — *माण्डूक्यकारिका* (शाङ्करभाष्यसहितम्)। वाराणसी: चौखम्बा ओरिएण्टालिया, २००५।
5. Chinmayananda, Swami — *Advaita Makaranda: An English Commentary*। Mumbai: Chinmaya Mission Publications, 1982।
6. Tejomayananda, Swami — *Nectar of Advaita: A Commentary on Advaitamakaranda*। Mumbai: Chinmaya Mission, 1996।
7. Radhakrishnan, S. — *The Principal Upanishads*। Delhi: Oxford University Press, 1953।